नामानन्देभ्यः श्रेष्ठत्वम् शत० ब्रा० १४।७।१।३१ वाक्यादौ उक्तं यथा "एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति। स यो मनुष्याणां राद्धः समृद्धो भवति। अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः। अथ ये शतं मनुष्याणामानन्दाः। स एकः पितॄणां जितलोकानामानन्दः। अथ ये शतं पितॄणां जितलोकानामानन्दाः। स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते। अथ ये शतं कर्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतमाजानदेवानामानन्दाः। स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं लोक आनन्दाः। स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं गन्धर्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दः अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः एष ब्रह्मलोकः सम्राडिति" मू०। "परमो मोक्षलक्षणो लोकः स्वयंज्योतिःस्वभावो लोकशब्दस्य मुख्यवृत्तिविषयः स्वाभाविकः। परमः स्वरूपानुभवलक्षणो मुख्यो निरतिशय आनन्दः पूर्णानन्दः। किं च वस्तुतो नास्त्येवात्मसुखातिरिक्तं वैषयिकमपि सुखमित्याह एतस्यैव ब्रह्मानन्दस्य मात्रां कलाम् अन्यानि अविद्यया ब्रह्मणोऽन्यत्वेन परिकल्पितानि ब्रह्मादिस्तम्बपर्य्यन्तानि भूतान्युपजीवन्ति उपभुञ्जते तावन्मात्रयैवानन्दीनि भवन्तीत्यर्थः। मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तमुत्तरोत्तरशतगुणितातिशयशालिनां परब्रह्मानन्दावयववानां प्रतिपादनद्वारेणावयविनं निवृत्तगणितभेदमनतिशयं ब्रह्मानन्दं दर्शयितुमुत्तरा श्रुतिः प्रवर्त्तते" भा०।

ब्र(ब्र)ह्मापेत पु० सूर्य्यमण्डलस्थराक्षसभेदे "त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा। ब्रह्मापेतोऽथ ऋतजिद् धृतराष्ट्रश्च सप्तमः। माघमासे वसन्त्येते सप्त मैत्रेय भास्करे" विष्णुपु० २अंशे १०अ०।

ब्र(ब्र)ह्मारण्य न० ब्रह्मणोऽरण्यमिव। वेदपाठभूमौ त्रिका०।

ब्र(ब्र)ह्मार्पण न० १सर्वकर्मकर्त्तृत्वाद्यात्मकतया ब्रह्मचिन्तने ब्रह्मणि परमात्मनि ईश्वरे २सर्वकर्मफलानां सन्न्यासे च तत्प्रकारः कूर्मपु०४अ०उक्तो यथा "ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते। ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम्। नाहं कर्त्ता सर्वमेतद्ब्रह्मैव कुरुते तथा। एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः। प्रीणातु भगवानीशः कर्मणाऽनेन शाश्वतः। करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम्। यद्वा फलानां सन्न्यासं प्रकुर्य्यात् परमेश्वरे। कर्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम्"।

ब्र(ब्र)ह्मावर्त्त पु० "सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" मनूक्ते १देशभेदे २तत्रस्थे तीर्थभेदे च भा०व० ८३अ०।

ब्र(ब्र)ह्मासन न० ६त०। ब्रह्मण ऋत्विग्भेदस्य १आसने ब्रह्मास्तरणादयोऽप्यत्र। ब्रह्मणस्तदुपासनाङ्गमासनम्। २पद्मस्वस्तिकादौ आसने। "ब्रह्मासनं तदावर्ज्य यद् कृत्वा ब्राह्मणो भवेत्। एकपादमूरौ दत्त्वा तिष्ठेद्ब्रह्माकृतिर्भवेत्" रुद्रया० उक्ते देवपूजाङ्गे ३आसनभेदे च।

ब्र(ब्र)ह्मास्त्र न० ६त०। अस्त्रभेदे भा० आ० १६६ अ०।

ब्र(ब्र)ह्माहुति न० ब्रह्मैवाहुतिः। वेदाध्ययने "ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम्" मनुः।

ब्र(ब्र)ह्मिन् पु० ब्रह्म वेदस्तपो वाऽस्त्यस्य शेषतया ब्रीह्या० इनि टिलोपः। वेदतपसोः शेषीभूते १परमेश्वरे। तदाराधनार्थमेव तयोरनुष्ठानात् तस्य तच्छेषित्वम्। "ब्रह्मविद् ब्राह्मणो ब्रह्मी" विष्णुस०। ब्रह्म वेदो वेद्यतयास्त्यस्य इनि। २वेदतदर्थाभिज्ञे।

ब्र(ब्र)ह्मिष्ठ त्रि०अतिशयेन ब्रह्मी इष्ठन् टिलोपः। अतिशयेन ब्रह्मज्ञे। "ब्राह्मणा भगवन्तो यो ब्रह्मिष्ठः स एता (गाः) उदजताम्" वृ०उ० "ब्राह्मणाः श्रुताध्यायानिष्ठास्तदर्थनिष्ठाः सर्वे यूयं ब्रह्मणोऽतिशयेन अभिज्ञः" भा०। "ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम्" रघुः। २दुर्गायां स्त्री "ब्रह्मिष्ठा वेदमातृत्वात् गायत्री चरणान्मता। वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी" देवीपु० ४५अ०।

ब्र(ब्र)ह्मी स्त्री ब्रह्मणे हिता मेधाजनकतया अण् टिलोपः ब्रा० न वृद्धिः ङीप्। (वामनहाटि) ख्यनामख्याते लताभेदे त्रिका०।

ब्र(ब्र)ह्मीघृत न० स्वारस्वतघृतमिति ख्याते औषधविशेषे यथा "समूलपत्रासतृपाधन्न ब्रह्मीं प्रक्षाल्य वारिणा। उदूखले क्षोदयित्वा रसं वस्त्रेण गालयेत्। रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत्। हरिद्रा